बालाशौचं यथा,—
"अजातदन्ता ये बाला ये च गर्भाद्विनिःसृताः ।
न तेषामग्निसंस्कारो न पिण्डं नोदकक्रिया ॥
यदि गर्भो विपद्येत स्रवते वापि योषितः ।
यावन्मासान् स्थितो गर्भस्तावद्दिनानि सूतकम् ॥
आ नामकरणात् सद्य आ चूड़ान्तादहर्निशम् ।
आ व्रतस्यास्त्रिरात्रेण तदूर्द्ध्वं दशभिर्दिनैः ॥"
इति गारुड़े १०६ अध्यायः ॥
बालकस्य रक्षा यथा,—
"आदाय कृष्णं संत्रस्ता यशोदापि ततो द्विज ! ।
गोपुच्छभ्रामणेनाशु बालदोषमपाकरोत् ॥
गोपुरीषमुपादाय नन्दगोपोऽपि मस्तके ।
कृष्णस्य प्रददौ रक्षां कुर्व्वन्निदमुदीरयन् ॥
नन्द उवाच ।
रक्षतु त्वामशेषाणां भूतानां प्रभवो हरिः ।
यस्य नाभिसमुद्भूतपङ्कजादभवज्जगत् ॥
येन दंष्ट्राग्रविधृता धारयत्यवनी जगत् ।
वराहरूपधृक् देवः स त्वां रक्षतु केशवः ॥
नखाङ्कुरविनिर्भिन्नवैरिवक्षःस्थलो विभुः ।
नृसिंहरूपी सर्व्वत्र स त्वां रक्षतु केशवः ॥
वामनो रक्षतु सदा भवन्तं यः क्षणादभूत् ।
त्रिविक्रमः क्रमाक्रान्तत्रैलोक्यः स्फुरदायुधः ॥
शिरस्ते पातु गोविन्दः कण्ठं रक्षतु केशवः ।
गुह्यं सजठरं विष्णुर्जङ्घापादं जनार्द्दनः ॥
मुखं बाहू प्रबाहू च मनः सर्व्वेन्द्रियाणि च ।
रक्षत्वव्याहतैश्वर्य्यस्तव नारायणोऽव्ययः ॥
शार्ङ्गखड्गगदाचक्रशङ्खनादहताः क्षयम् ।
गच्छन्तु प्रेतकुष्माण्डा राक्षसा ये तवाहिताः ॥
त्वां पातु दिक्षु वैकुण्ठो विदिक्षु मधुसूदनः ।
हृषीकेशोऽम्बरे भूमौ रक्षतु त्वां महीधरः ॥
एवं कृतस्वस्त्ययनो नन्दगोपेन बालकः ।
शायितः शकटास्याधो बालपर्य्यङ्किकातले ॥"
इति विष्णुपुराणे । ५ । ५ ॥

बालकप्रिया, स्त्री, (बालकानां प्रिया ।) इन्द्रवारुणी । कदली । इति राजनिर्घण्टः ॥

बालकृमिः, पुं, (बालस्य केशस्य कृमिः ।) केशकीटः । इति जटाधरः ॥

बालक्रीड़नं, क्ली, (बालस्य क्रीड़नम् । क्रीड् + भावे ल्युट् ।) बालखेला । यथा,—
"बालक्रीड़नमिन्दुशेखरधनुर्भङ्गावधि प्रकृता ॥"
इत्यादि महानाटकम् ॥

बालक्रीड़नकः, पुं, (बालानां क्रीड़नकः क्रीड़नद्रव्यम् । बालका हि कपर्द्दकेन क्रीड़न्तीति प्रसिद्धिस्तथात्वम् ।) कपर्द्दकः । इति राजनिर्घण्टः ॥

बालखिल्यः, पुं, बालखिल्यमुनिः । यथा,—
"विधिना निर्म्मिता पूर्व्वं वेदी परमपावनी ।
अग्निवेश्यादिमुनयो बालखिल्यादयः स्थिताः ॥"
इति वृहद्रामायणे चित्रकूटमाहात्म्ये १ सर्गः ॥
(बालखिल्यास्तु अङ्गुष्ठपरिमिताः षष्टिसहस्रसंख्यकाः । यथा, मार्कण्डेये । ५२ । २४ ।
"क्रतोश्च सन्ततिर्भार्य्या बालखिल्यानसूयत ।
षष्टिर्यानि सहस्राणि ऋषीणामूर्द्ध्वरेतसाम् ॥"
अङ्गुष्ठपरिमितमुक्तमेतेषान्देहपरिमाणम् । यथा, महाभारते । १ । ३१ । ८—९ ।
"अथापश्यदृषीन् ह्रस्वान् अङ्गुष्ठोदरवर्ष्मणः ।
पलाशवृन्तिकामेकां सहितान् वहतः पथि ॥
क्लिश्यमानान् मन्दबलान् गोष्पदे संप्लुतोदके ॥")

बालगर्भिणी, स्त्री, प्रथमगर्भवती गौः । तत्पर्य्यायः । प्रष्ठौही २ । इत्यमरः ।२।९।७०॥ पलौकी ३ । इति जटाधरः ॥ बालगर्भवती ४ । इति शब्दरत्नावली ॥

बालगोपालः, पुं, (बालः शिशुमूर्त्तिधरो गोपालः ।) श्रीकृष्णमूर्त्तिविशेषः । यथा,—
"तीरपयोनिधिहृत्तनिवासं
हास्यकटाक्षजवंशिनिनादम् ।
श्यामलसुन्दरनृत्यविलासं
तं प्रणमामि च बालगोपालम् ॥"
इति नारदपञ्चरात्रे गोपालाष्टकम् ॥

बालग्रहः, पुं, (बालानां बालकानां ग्रहः ।) बालकहन्तृग्रहविशेषः । (यथा, मार्कण्डेये । ६२ । २७ ।
"बालग्रहाभिभूतानां बालानां शान्तिकारकम् ॥")
एतेषां विवरणम् । यथा,—
"बालग्रहा अनाचारात् पीड़यन्ति शिशुं यतः ।
तस्मात्तदुपसर्गेभ्यो रक्षेद्बालं प्रयत्नतः ॥"
अथ बालग्रहाणां नामान्याह ।
"स्कन्दग्रहस्तु प्रथमः स्कन्दापस्मार एव च ।
शकुनी रेवती चैव पूतना गन्धपूतना ॥
पूतना शीतपूर्व्वा च तथैव मुखमण्डिका ।
नवमो नैगमेयश्च प्रोक्ता बालग्रहा अमी ॥"
अथ ग्रहाणामुत्पत्तिमाह ।
"नवस्कन्दादयः प्रोक्ता बालानां ये ग्रहा अमी ।
श्रीमन्तो दिव्यवपुषो नारीपुरुषविग्रहाः ॥
एते स्कन्दस्य रक्षार्थं कृत्तिकोमाग्निशूलिभिः ।
सृष्टाः शरवणस्थस्य रक्षितस्य स्वतेजसा ॥
स्कन्दः सृष्टो भगवता देवेन त्रिपुरारिणा ।
बिभर्त्ति चापरां संज्ञां कुमार इति संग्रहः ॥"
अयं हि कार्त्तिकेयादन्यः ।
"स्कन्दापस्मारसंज्ञो यः सोऽग्निना तत्समद्युतिः ।
स च स्कन्दसखो नाम्ना विशाख इति चोच्यते ॥
ग्रहाः स्त्रीविग्रहा ये ते नानारूपाः प्रकीर्त्तिताः ।
देवानां कृत्तिकानां ते भागा राजसतामसाः ॥
नैगमेयस्तु पार्व्वत्या सृष्टो छागाननो ग्रहः ।
कुमारस्य हि देवस्य गुहस्यात्मसमोऽस्ति वै ॥
ततो भगवति स्कन्दे सुरसेनापतौ कृते ।
उपतस्थुर्ग्रहा ह्येते दीप्तशक्तिधरं गुहम् ॥
ऊचुः प्राञ्जलयश्चैनं वृत्तिर्नो दीयतामिति ।
तेषामर्थे ततः स्कन्दः शिवं देवमचोदयत् ॥
ततो ग्रहांस्तानुवाच भगवान् भगनेत्रहृत् ।
तिर्य्यग्योनिं मानुषञ्च दैवञ्च त्रितयं जगत् ॥
परस्परोपकारेण वर्त्तते धार्य्यते तथा ।
देवा नरान् प्रीणयन्ति तिर्य्यग्योनींस्तथैव च ॥
यथाकालं प्रवृत्तास्तु उष्णवर्षाहिमानिलैः ।
इज्याञ्जलिनमस्कारैर्जपहोमैस्तथैव च ॥
सम्यक् प्रयुक्तैश्च नराः प्रीणयन्त्यपि देवताः ।
भागधेयं विभक्तञ्च शेषं किञ्चिन्न विद्यते ॥
तद्युष्माकं शुभा वृत्तिर्बालेष्वेव भविष्यति ॥"
अथ बालग्रहाणां बालग्रहणकारणमाह ।
"कुलेषु येषु नेज्यन्ते देवाः पितर एव च ।
ब्राह्मणाः साधवो वापि गुरवोऽतिथयस्तथा ॥
निवृत्तशौचाचारेषु तथा कुत्सितवर्त्तिषु ।
निवृत्तभिक्षाबलिषु भग्नकांस्यगृहेषु च ॥
गृहेषु तेषु बालांस्तान् ग्रहा हिंसन्त्यशङ्किताः ।
तत्र वो विपुला वृत्तिः पूजा चैव भविष्यति ॥
एवं ग्रहाः समुत्पन्ना बालान् हिंसन्ति चाप्यथ ।
ग्रहोपसृष्टा बालाः स्युर्दुश्चिकित्स्यतमास्ततः ॥"
अथ सामान्यग्रहजुष्टानां बालानां लक्षणान्याह ।
"क्षणादुद्विजते बालः क्षणात्त्रस्यति रोदिति ।
नखैर्दन्तैर्दारयति धात्रीमात्मानमेव च ॥
ऊर्द्ध्वं निरीक्षते दन्तान् खादेत् कूजति जृम्भते ।
भ्रुवौ क्षिपति दन्तौष्ठः फेनं वमति वासकृत् ॥
क्षामोऽति निशि जागर्त्ति शूनाङ्गो भिन्नविट्-
स्वरः ।
मत्स्यशोणितगन्धश्च न चाश्नाति यथा पुरा ॥
दुर्व्वलो मलिनाङ्गश्च नष्टसंज्ञोऽपि जायते ।
सामान्यग्रहजुष्टस्य लक्षणं समुदाहृतम् ॥"
अथ विशिष्टग्रहजुष्टानां लक्षणान्याह ।
"स्रस्ताङ्गः क्षतजसगन्धिकस्तनद्विट्-
वक्रास्यो हतचरणैकपक्षनेत्रः ।
उद्विग्नः ससलिलचक्षुरल्परोदी
स्कन्दार्त्तो भवति च गाढ़मुष्टिबन्धः ॥
निःसंज्ञो भवति पुनर्लभेत संज्ञां
संरब्धः करचरणैश्च नृत्यतीव ।
विण्मूत्रे सृजति विनद्य जृम्भमाणः
फेनं वा सृजति च तत्सखाभिजुष्टः ॥"
तत्सखाभिजुष्टः स्कन्दापस्मारयुक्तः ।
"स्रस्ताङ्गो भयचकितो विहङ्गगन्धिः
सास्रावव्रणपरिपीड़ितः समन्तात् ।
स्फोटैश्च प्रचिततनुः सदाहपाकै-
र्विज्ञेयो भवति शिशुः क्षतः शकुन्या ॥
रक्तास्यो हरितमलोऽतिपाण्डुदेहः
श्यावो वा सुखकरपाकवेदनार्त्तः ।
गृह्णातिव्यथिततनुश्च कर्णनासं
रेवत्या भृशमभिपी ड़ितः कुमारः ॥
स्रस्ताङ्गः स्वपिति न वासरे न रात्रौ
विड्भिन्नं विसृजति काकतुल्याङ्गगन्धिः ।
छर्द्दार्त्तो हृषिततनूरुहः कुमार-
स्तृष्णालुर्भवति च पूतनागृहीतः ॥
यो द्वेष्टि स्तनमत्ति न कासहिक्का-
च्छर्द्दीभिर्ज्वरसहिताभिरर्द्यमानः ।
दुर्व्वर्णः सततमधापि योऽस्रगन्धि-
स्तं ब्रूयाद्भिषगथ गन्धपूतनार्त्तम् ॥
आक्रन्दन् परिचकितः सुवेपमानः
संलीनो भवति यथान्त्रकूजयुक्तः ।